# ☆ प्रथमपरिच्छेदः......................परिचयात्मकः ☆

पृष्ठानि

(१) प्रथमपरिच्छेदः .........( परिचयात्मकः )..................................................१ तः २५

(१) कालिदासस्य साहित्यिकपरिचयः ।........................................................................१ तः ८

(२) तत्कृतीनां सामान्यपरिचयः ।..............................................................................९ तः ११

(३) तद्वर्णितविषयाणामुल्लेखः ।................................................................................१२ तः २५

Chapter - 1

SMT. HANSA MEHTA LIBRARY

# प्रथमपरिच्छेदः .........(परिचयात्मकः)

## (१) कालिदासस्य साहित्यिकपरिचयः।

**अ. स्थितिकालः**— अस्माकं संस्कृतसाहित्यजगति ख्यातिमापन्नो महाकविः कालिदासस्य साहित्यिकपरिचयात्पूर्वं तेषां जन्मस्थानकालविषयेऽपि दृष्टिपातमावश्यकमतः प्रथमं तावत् जन्मवृतविषये समासेन विविच्यते।

महाकविः कालिदासजन्मः भारतवर्षस्य कस्मिन् ग्रामे जनपदे प्रदेशे वा कदाऽभूत नास्ति निश्चितम्। केषाञ्चन मतानुसारेण महाकविः कालिदासः विक्रमादित्यस्य नवरत्नेष्वन्यतम आसीत्। ते उदाहरन्ति यथा—

**धन्वन्तरिक्षपणका – मर सिंह – शङ्कु – वेताल भट्ट – घटखर्पर – कालिदासाः।**

**ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य।।**

भारतीयेतिहासे चतुर्णां विक्रमनामधारिणो राज्ञामुपलब्धिर्भवति। एको विक्रमादित्यः ५५४ खिष्ताब्दे प्रतापिनं राजानं मिहिरकुलं हूणवंशीयं कारूरयुद्धे ऽजयत्। स्वविजयख्यापनाये च विक्रमसंवत्सरस्य प्रारम्भणमकार्षीत्। डॉ. हार्नली महोदयानुसारेण इयं संवत्सरघोषणा ५८ खिष्ताब्दतः पूर्वमेव कृता। फार्गुस महोदयोऽपि अस्यैव मतस्य समर्थकोऽस्ति। स्मिथ – मैकडोनल – कीथ – भण्डारकर – पाठक प्रभृतयो विद्वांसः गुप्तयुगे स्वीकुर्वन्ति कालिदासमिति गैरोला महोदयाऽचार्यबलदेवोपाध्यायाश्च स्वीकुर्वन्ति। यथा पाठकमहोदयः काश्मीरी टीकाकारो वल्लभदेवस्य निम्नश्लोकं प्रामाणिकं मत्वा पूर्वोक्त सिद्धान्तं स्वीकरोति। यथा रघुवंशे—

**विनीताध्वश्रमास्तस्य सिन्धुतीर विचेष्टनैः।**

**दुधुवुर्वाजिनः स्कन्धाँल्लग्नकुङ्कम केसरान्।।**[१]

अष्टमषष्टिख्रिष्ताब्दे लिखिते राजा हालस्य 'गाथा सप्तशती' नामके ग्रन्थेपि एकस्य विक्रमनामकस्य नृपतेरूपलब्धिर्भवति। यथा—

---

१. रघुवंशे – ४/६७,

संवाहणसुहर सतोतिएण देन्तेण तुहकरे लक्खम्।

चलणेण विक्कमाइत चरिअं अणुसिक्खिअंतिस्सा।।[1]

प्राचीनकाले मालवेति नामाख्यगणानां विशेषप्रभुत्वमासीत्। ईस्वीपूर्व तृतीयशताब्दे 'क्षूद्रक' गणेन सह मिलित्वा सिकन्दरेण सह युद्धं चकार। अग्रेगत्वा प्रथम द्वितीयशताब्दौ स्वप्रभुत्वं स्थापितवान्। एषो गणणराज्यमासीत्, तथा विक्रमादित्याऽपि अस्य गणतन्त्रस्य मुख्य आसीत्। तदानिन्तनकाले शकान् युद्धे पराजित्य विक्रमादित्यः 'शकारीति' उपाधिं प्राप्य मालवगणं प्रतिष्ठितम्। अतोऽस्य सम्वत्सरस्य मालवगण–स्थितिः। यथा–

मालवानां गणस्थित्वा याते शतचतुष्टये।

त्रिनवत्यधिकेऽब्दानामृतौ सेव्यघनस्तने।।[2]

श्री भगवत्सरण उपाध्यायमतानुसारेण कालिदासस्य अश्वमेधयज्ञानां धर्मिकाचारविचाराणां निष्ठाप्रभृतीनां च विशदं विवेचनमकरोत्। अत एव ज्ञायते यत् कालिदासेन वर्णितं चित्रं गुप्तकालस्यैव वर्तते, गुप्तकालस्य राजानः परमभागवता आसन्। केचन् पाश्चात्यालोचकाः भगवतशरण उपाध्याश्च कालिदासेन प्रयुक्तं जामित्रशब्दं ग्रीकज्योतिषशास्त्रस्य मत्वा कालिदासस्य कालं गुप्तकालिकं स्वीकुर्वन्ति। वी. वरदाचार्यानुसारेण सर्वप्रथमं ज्योतिः शास्त्रस्य यूनानिपारिभाषिकशब्दानां प्रयोगमार्यभट्टः ५०० ईस्वीय अकरोत्। इमं जामित्रशब्दं कालिदासः आर्यभट्टतः स्वीचकारः।

सरविलियमजोन्समहोदयः, डॉ.पीटर्सनमहोदयः, वी. वरदाचार्यःकेशवभाई ध्रवः, आचार्य सूर्यनारायणो व्यासः,र. पं. कंगले महोदयः, डॉ. राजबली पाण्डेयमहोदयः, कन्हैयालाल पोद्दारश्च कालिदासस्य स्थितिकालं ई. पूर्वप्रथमशतकं स्वीकुर्वन्ति। "उज्जयिन्याः ज्योतिर्विद पं.मोरेश्वर नीलकण्ठदीक्षितमहोदयस्य ज्योतिषशास्त्रीयगणनानुसारेण जन्मोऽद्यतः २०६२वर्षं पूर्वःउज्जयिन्यामभवत्। तस्य जन्मराशीमिथुनः, व्यवहारिको नामचन्द्रचूडःचन्द्रमौलि वा तथाजन्मक्षरानुसारेणप्रख्यातो नामोकालिदास आसीत्। ( नवप्रभातम् अंकः–७१९ कानपुर) पण्डितवर्य ओरेश्वरो दीक्षितमतानुसारेण कालिदासस्य जन्मः कलिसंवत् ३०३० विक्रमाब्दः २४वर्षं अर्थात् ७१वर्षं ई.पूर्वः प्रभवनामसंवत्सरे बभूव। – (कालिदास और उनका युग तः)

---

१. गाथासप्तशती – ५/६४, २. वत्सभट्टिः – मन्दसौर शिलालेखः

**ब. जन्मस्थानम्**— येनप्रकारेण कालिदासस्य स्थितिकालो विवादास्पदो वर्तते, तेनैवप्रकारेण कालिदासस्य जन्मस्थानमप्यतीव विवादास्पदं वर्तते। यथा प्रसिद्धः युनानिकविः होमरस्य जन्मस्थान भवितुं सप्तनगर्य. परस्परं प्रतिस्पर्धा कुर्वन्ति, तथैवास्य महाकवेः शैशवभूम्यर्थं भारतवर्षस्य पृथक्—पृथक् प्रदेशाः स्व—स्वाधिकारमुपास्थापयन्ति। बंगीय—साहत्यि—सहृदयभावुकाः 'कालिदासः' इत्यभिधानानुसारेणैव तर्कयन्ति यत् बङ्गीयाः कालिभक्ताः भवन्ति, तथैव महाकव्यपि कालिभक्तः आसीत् तदर्थं तस्य 'कालिदासः' नाम्ना 'कालिदासः' बंगीय इति स्वयं सिद्ध्यति। अन्यच्च—

'मेघदूते' **'आषाढस्य प्रथमदिवसे'** उल्लेखोऽस्ति, बङ्गे सौरमासस्य प्रारम्भः आषाढस्य प्रथमदिवसतः भवति, तेन 'कालिदासः' बंगीय इति तर्कमुपस्थापयति। किन्तु कालिदासस्य ग्रन्थानामवलोकेन ज्ञायते यत् कालिदासस्य उज्जयिन्याः विषये महान् पक्षपातः आसीत्। अतः एवायं कविः उज्जयिन्या एव अभिजनम् आसीत् इति केचन स्वीकुर्वन्ति। उज्जयिनी वर्णनं यथा—

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तरशां, सौधात्संगप्रणयविमुखो मा स्म भूरुज्जयिन्याः।**

**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां,लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।**[१]

विरहीस्वपत्नीं प्रति स्वकुशलमयीं वार्तां प्रेषितुकामः यक्षं शीघ्रता वर्तते, तथाऽपि अत्र मेघमुज्जयिनीं गन्तुं प्रेरयति वक्रः पन्था सत्यपि। अनेन प्रसंगेन कालिदासस्य उज्जयिन्यांप्रत्यधिकानुरागो दृश्यते।

श्री देवदत्तः शास्त्री महोदयानुसारेण शाकुन्तले वर्णितानां कण्वाश्रम—मालिनीप्रभृतीनां यादृशी सजीवता दृश्यते तादृशी वर्णनसजीवता रघुवंश – कुमारसंभव – मेघदूत – विक्रमोर्वशीय – मालविकाग्निमित्रप्रभृतिषु ग्रन्थेषु वर्णितानां स्थानानां वर्णने कालिदासस्यात्मीयता नह्याभाति। यद्यपि मेघदूते यक्षः मेघमृजुमार्गतः अपाकृत्य तम् उज्जयिनीं नूनं नयति, परन्तु कालिदासस्य उज्जयिनी— हि प्रतीयते न वा तत्रत्या पवित्रता सूक्ष्मता वा।

अभिज्ञानशाकुन्तले कविः प्रत्येकेषां स्थानानां प्रत्येकेषां वस्तूनां विशदं वर्णनं समुपलभ्यते। हिमालय पर्वतस्य उभयपार्श्वयोः समुचितं वर्णनं तेन प्रकारेण करोति कविः यथा तानि सर्वाणि सीनानि कविना साक्षात्कृतानि स्युः। अत एव एतेषु स्थानेषु

---

१. मेघदूत – १/२७

महाकवे. महती आत्मीयता आभाति।

यद्यपि महाकविः उज्जयिन्या अपि सजीवं चित्रणं करोति, तथाऽपि अस्य वर्णनस्य प्रधानं कारणमेतद् वर्तते यत् महाकवेरुपास्य इष्टदेवो महाकालः शङ्करो वर्तते। अत एव महाकविः रूचिरतमं वर्णनं करोति उज्जयिन्याः। श्री शास्त्रिमहोदयानुसारेण महाकविः कालिदास॰ गढवाल मण्डलस्य निवास्यासीत्। शास्त्रिमहोदयो वक्ति यत् महाकविः कालिदासः स्वजन्मभूमिं प्रख्याततमां चिररमणीयां च कर्तुम् – अभिज्ञानशाकुन्तलनामकस्य ग्रन्थस्य प्रणयनमकरोत्। कालिदासस्य शकुन्तलायामतीवात्मीयता आसीत्, अत एव सा सृष्टेः सर्वोत्तमासुन्दरीरूपेण चित्रिता बभूव। अत एव कालिदासस्य जन्मस्थानं गढवालमण्डलमेव स्वीकरणीयमिति शास्त्रिमहोदयस्याभिप्रायः।

डॉ. नौटियालमहोदयः महाकवेः जन्मविषये येषां विदूषां मतानि संकलनं विवेचनञ्च कृतमस्ति। ते निम्नाङ्किताः सन्ति।

- कालिदासः काशी निवासी – वाल्टन रुबन।
- कालिदासः बङ्गनिवासी – बङ्गाली संस्कृतप्रेमी।
- कालिदासः विदर्भनिवासी – डॉ. ग्रिर्यसन।
- कालिदासः विन्ध्यनिवासी – डॉ. चन्द्रवली पाण्डे।
- कालिदासः विदिसा निवासी – प्रो. पराञ्जये एवं म.म.डॉ. हरप्रसाद शास्त्रीय।
- कालिदासः मन्दसौरनिवासी– आचार्य शेषराज शर्मा रेग्मी डॉ .रुद्रप्रसाद शास्त्री च ।
- कालिदासः जालौरनिवासी– पं. सूर्यनारायणो व्यासः।
- कालिदासः उज्जैननिवासी–प्रो.झाला श्री अरविन्दः, डॉ शिवप्रसादो भारद्वरजश्च।
- कालिदासःविहारनिवासी– डॉ.आदित्यनारायण झा।
- कालिदासः काश्मीरनिवासी– प्रो. लक्ष्माधर कल्ला,श्री अरविन्दः, डॉ. भगवतशरण उपाध्यायः,डॉ.रमाशंकरः तिवारी च ।
- कालिदासः गढवालनिवासी– डॉ सम्पूर्णानन्दः।

**क. साहित्यिकपरिचयः–** कालिदासोऽस्माकं भारतवर्षस्य राष्ट्रीयकविः वर्तते। अतः तस्य काव्येषु देशप्रेम्णः भव्यभावनां दृष्ट्वा अस्मान् आश्चर्यो न भवति। कालिदासः उज्जयिन्याः महाकालस्योपासक आसीत् अतः तस्य साहित्यग्रन्थे शिवार्चना दृश्यते। कालिदासः शंकरस्य अष्टमूर्तीनामुल्लेख स्व काव्यनाटकेषु असकृत् कृतमस्ति। यथा

उदाहरणरूपेणशाकुन्तलनाटकस्य मङ्गलाचरणे अष्टमूर्तीनामुल्लेखो क्रमश· वर्तते। 'मालविकग्निमित्रम्' नाटके नान्द्यामेव अष्टमूर्तीनां संकेतो वर्तते यथा '**अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः**' एवं प्रकारेण कुमारसम्भवे यथा–

**कलितान्योन्यसामर्थ्ये पृथिव्यादिभिरात्मभिः।**

**येनेदं ध्रियते विश्वं धुर्यैयानमिवाध्वनिः।।**[१]

अनेन स्पष्टं भवति यत् कालिदासस्य साहित्यिक जीवने विकासरहस्यं शिवोपासना वर्तते। अतः स्वग्रन्थे सर्वान् शिवोपासनां प्रति आग्रहं दर्शितोऽस्ति। भारतवर्षस्य भालस्थले विराजमानो हिमालयस्य प्रशंसकः कविकालिदासः। कालिदासस्य काव्ये हिमालयः स्वपूर्णवैभवेन सह विलसति। रघुवंश विक्रमोवशीयं शाकुन्तले तु प्रसंगवशात् हिमालयस्य प्रसङ्ग आगच्छति परन्तु 'कुमारसम्भवं' तु हिमालयस्य सौन्दर्य शोभायाः कमनीयकसव्योऽस्ति। तत्र हिमालयः एको निर्जीवप्रस्तरखण्डो न वर्तते परन्तु सजीवदेवात्माऽस्ति। यथा –

**"अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।।"**[२]

यत्र हिमाच्छादितः कैलाशस्योपरि श्रीशंकरः पार्वत्या सह अखण्डतपे निरतो भवति। कालिदासस्य प्रतिभायाः आलोके हिमालयस्य चित्रं प्रकाशितं भवति यस्य पवित्रता, उदारता तथा प्रभया च भारतीय संस्कृतिः, सद्यः वैज्ञानिकः, भौतिकः, आध्यात्मिकश्च एषां समस्तरूपाणां सांकेतिकः परिचयो ददाति। यथा– हिमालयस्य भौतिकरूपं कुमारसम्भवे –

**आमेखलं सञ्चरतां घनानां,छायामधः सानुगतां निषेव्य।**

**उद्वेजिता वृष्टिभिराश्रयन्ते, श्रृङ्गाणि यस्या तपवन्ति सिद्धाः।।**[३]

तत्रैव धातुताम्रधरः, देवदारुबृहद् भुजः एतादृशो हिमालयः महनीयो जङ्गम पुरुषरूपेण चित्रितमस्ति। यथाऽस्मिन् पद्ये–

**धातुताम्रधरः प्रांशुर्देवदारु बृहद् भुजः।**

**प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति।।कुमार. ६/५१।।**

एवं प्रकारेण संस्कृतसाहित्ये भारतीयसंस्कृतेरुन्नतकल्पनायाः दर्शनं

१. कुमारसम्भव – ६/७६, २. – १/१, ३. कुमारसम्भव – १/५

कालिदासस्यान्य ग्रन्थेऽपि

नानाप्रकारेण भवति। कालिदासः भारतीय साहित्यस्य सर्वश्रेष्ठो विभूतिरस्ति। अस्मिन् विषये महर्षि अरविन्दस्य कथनमस्ति यत् वाल्मीकिः, व्यासः तथा कालिदासश्च प्राचीनभारतीयइतिहासस्य अन्तरात्मायाः प्रतिनिधय सन्ति, सर्वं नष्टे सत्यपि एतेषां कृतिषु अस्माकं संस्कृतेः प्राणतत्त्वं सुरक्षितं स्थास्यति। यथा 'सत्यम् शिवम् –सुन्दरम्' अस्य एकत्र परिकल्पना केवलं कालिदासस्य कृतिषु प्राप्यते।

महाकविः कालिदासस्य नैसर्गिकवाण्यां शूरवीरतः भीरुषु पर्यन्तमुत्साहः स्फुरणशक्तिरासीत्। प्रकृत्याः सूक्ष्मनिरीक्षणं तथा मानवमानसे निहीतगूढभावानां ज्ञाने कालिदासमद्वितीयसिद्धिः प्राप्तिरासीत्।

श्रृंगाररसस्यान्यतममहाकविरासीत्, करुणरसेऽपि सःसिद्धहस्तो वर्तते। कुमारसंभवस्य रतिविलापः रघुवंशे अजविलापस्य करुणात्मकवर्णनं श्रुत्वा सर्वेषां मनसि दुःखानुभवं भवति, भूयो भूय करुणदृश्यं स्मृत्वा रुदन्ति ते।

महाकवेः त्रयैव नाटकाः स्व–स्व स्थाने महत्वं धारयन्ति, परन्तु "अभिज्ञानशाकुन्तलम्" नाटकस्य तूलना कोऽपि अद्यावधि नैवकर्तुं समर्थाः। नाटकस्य श्रेष्ठताविषये इयं सूक्तिः प्रसिद्धोऽस्ति। यथा–

**" काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला"**

महाकवेः भौगोलिकज्ञानमपि समुन्नतमासीत्। अस्य ज्ञानं रघुवंशस्य रघुदिग्विजयः, मेघदूतस्य पञ्चमश्लोकाच्च ज्ञायते। यथा–

**" धूमज्योतिः सलिलमरुतां सन्निपात क्व मेघः ।।"**[१]

उपमासम्राट् महाकविकालिदासः संस्कृतसाहित्याकाशस्य सर्वाधिको देदिप्यमानो नक्षेत्रो वर्तते। तस्य साहित्यिकपरिचयो वर्णनप्रसेगे अस्माकं बुद्धिः तस्य महाकाव्येषु नाटकेषु च।।भावगाम्भीर्यं, तत्वविषयिणीसूक्ष्मेक्षिका, विवेचनं वैशिष्ट्यञ्च दृष्ट्वा महत्याश्चर्यं अनुभवति, तस्य विषये वर्णनमधिकमपिस्वल्पमेव।

**ड. कालिदासस्य काव्यशैलीः–** कालिदासस्य कविता संस्कृतसाहित्यस्य श‍ृङ्गारो विद्यते।

१. मेघदूते – १/५,

माधुर्यस्य सुमधुरसन्निवेशः, प्रसादस्य स्निग्धता, सरसपदविन्यासः, अर्थगौरवम्, अलङ्कारस्य मञ्जुलप्रयोगः, एतत् सर्वमपि काव्यस्य महनीयलक्षणं कालिदासस्य कवितासु पदे – पदे दृश्यते। कालिदासस्य काव्यशैल्यपि साहित्यजगति प्रसिद्धाऽस्ति। कुमारसम्भवे –

कालिदासेन काव्येऽस्मिन् जीवनदर्शनस्य निगूढतत्त्वानि सरसविधिना समुपस्थापितानि कुमारसम्भवस्य पञ्चम सर्गे शिवस्य विषमजीवनेन सह तस्य माङ्गलिकप्रवृतीनां युगपद् वर्णनमत्रोदाहार्यम्।यथा–

**वपुर्विरूपाक्षमलक्ष्यजन्मता, दिगम्बरत्वेन निवेदितं वसु।**

**वरेषु यद् बाल मृगाक्षि मृग्यते, तदस्ति किं व्यस्तमपि त्रिलोचने।। कुमा.५/७२।।**

**अकिञ्चनः सन् प्रभवः स सम्पदां, त्रिलोकनाथः पितृसद्मगोचरः।**

**स भीमरूपःशिव इत्युदीर्यते, न सन्ति याथार्थ्यविदः पिनाकिनः।।कुमा. ५/७७।।**

शैवदार्शनिकतत्वानां हृदयहारिव्याख्यानं कविना अत्र सन्निवेसितम्। कालिदासस्य उपमा तद्यथा–

**तद् गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव।**

**अपेक्षते प्रत्ययमुत्तमं त्वां, बीजांकुरःप्रागुदयादिवाम्भः।।३/१८।।**

अत्र देवानामुदयाय कामस्य नितरामपरिहार्यत्वं प्रतिपादयितुं बीजांकुरजलसम्बन्धस्योदाहरणं सर्वथा

समीचीनम्।

रघुवंशे – रघुवंशीयनृपाणां चरित्रनिवर्णने वीररसनात्मकघटनानां वैशिष्ट्यं स्वभावतो विलसति। अत एव क्षात्रधर्मेण राष्ट्रसुरक्षायाः परमं प्रयोजनं कविना प्रसाधितम्। रघुवंशस्याद्यसर्गद्वये प्रशान्तपरिवृत्तिः कविना सृष्टा यत्र हरिणा ऋषयो नन्दिनी गौश्च विद्यन्ते, तेषां मध्ये वीररसप्रतीकः सिंहः समागतः, तथाप्यसौ मायाकृत एव बभूव। दिलीपस्तस्याक्रमणं प्रतीक्षमाणस्तस्थौ तदा स सिंहोऽन्तर्हितोऽभवत्। नन्दिनी आह –

**उत्तिष्ठ वत्सेत्यमृतायमानं, वचो निशम्योत्थितमुत्थितः सन्।**

**ददर्श राजा जननीमिव स्वां, गामग्रतः प्रस्रविणीं न सिंहम्।।रघु.२/६१।।**

कालिदासस्य काव्यशैली मेघदूते। यथा–

कालिदासस्य कल्पनाविलासो मेघदूते व्यञ्जनया प्रस्फुटितः। मानवीकरणस्य शक्तिरत्र प्रदर्शितो कविना। अनयैव शक्त्या नदी–नगरी–नलिन्यादयो यत्र तत्र नायिकारूपेण व्यक्ताः। समग्रेऽस्मिन् काव्ये मन्दाक्रान्तया सह वैदर्भी – रीतेः सामञ्जस्यं विधातुं कालिदास एव समर्थो आसीत्। यथा–

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां । वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**[१]

ऋतुसंहारकाव्ये कालिदासस्य काव्यशैल्याः दिङ्मात्रमुदाहरणम्। यथा–

**काशांशुका विकचपद्ममनोज्ञनेत्रा, सोन्मादहंसरवनूपुरनादरम्या।**

**आपक्वशालिरुचिरानतगात्रयष्टिः, प्राप्ताशरन्नववधूरिवरूपरम्या।।**[२]

अत्र शरत्कालः वधूरिव प्रतिभासते। अस्य काव्ये हृदयपक्षस्य प्राधान्यं वर्तते, परिवर्तनशीलस्य मानवहृदयगतभावस्यापि व्यक्तौ कालिदासस्याद्भूतं कौशलं दृश्यते। स्वतन्त्रः प्रतिभासम्पन्नश्चायं कविः।अतः एव काव्यशैलीनिर्माणे नान्येषां कवीनाम् अनुकरणं करोति। रसमयपद्धतौ सुकुमारमार्गे च, भावस्य तीव्रतां, उदात्ततां चानेतुं अलंकारस्य प्रयोगः औचित्यानुसारेण भवति कालिदासस्य। अस्यौचित्यं विलोक्य उपमाकालिदासस्य इत्याभाणकं सत्यमेव प्रतीयते। कालिदासस्योपमासु लोकव्यवहारस्य प्रकृतेश्चापूर्वं सामञ्जस्यं दृश्यते। बाह्यान्तरचित्रणे कालिदासस्योपमा विलक्षणं चमत्कारं समुत्पादयति। रसनिरूपणेऽपि कालिदासोऽद्वितीयः। श्रृंगारस्य द्वयोः पक्षयोः सम्भोगविप्रलम्भयोः चित्रणे महाशिल्पी कालिदासः। कुमारसम्भवस्य चतुर्थसर्गे कामपत्न्याः रत्याः विलापः रघुवंशस्य अष्टमसर्गे अजाय इन्दुमत्याः विलापश्च कालिदासस्य करुणरसप्रवीणत्वं प्रकटयति। मेघदूते वियोगविधूरस्य यक्षस्य अचेतनमेघद्वारा प्रियासन्निधौ सन्देशप्रेषणं कालिदासस्यातिचमत्कारपूर्णा कल्पना विद्यते।

यक्षपत्न्याः सकरुणवर्णनमधीत्य केषां सचेतसां चित्तं न द्रवति। एवं हि काव्ये यत्र तत्र वैशिष्ट्यं तनोति किमधिकं वर्णयामः। अतः उपर्युक्तवर्णनाधारेण निष्कर्षतः कथयितुं शक्यते यत् कालिदासस्य प्रतिभा सर्वथा विलक्षणैव आसीत्।

---

१.मेघदूत– १/९, २. ऋतुसंहार – ३/१

## (२) तत्कृतीनां सामान्य परिचयः।

महाकवेः कालिदासस्य सप्तग्रन्थाः प्रख्याततमा वर्तन्ते। तेषु चत्वारकाव्यग्रन्थाः सन्ति।

१. रघुवंशमहाकाव्यम्।

२. कुमारसंभवमहाकाव्यम्।

३. मेघदूतकाव्यम्।

४. ऋतुसंहारकाव्यम् च।

तेषु ग्रन्थेषु त्रीणि नाटकानि सन्ति।

१. अभिज्ञानशाकुन्तलम्। २. विक्रमोर्वशीयम्। ३. मालविकाग्निमित्रम्।

### ❖ काव्यग्रन्थाः।

### १. रघुवंशमहाकाव्यम्।

संस्कृतमहाकाव्येषु वाल्मीकिरामायणाद् भिन्नस्य रघुवंशस्यैव मनोरमता समालोचकैः सर्वाधिका स्वीक्रियते। अस्मिन् महाकाव्ये ऊनविंशति सर्गाः विद्यन्ते। महाकाव्येऽस्मिन् रघुवंशीयानां नृपाणां चरितं वर्णितमस्ति। दिलीपात् प्रारभ्याग्निवर्णपर्यन्तानां नृपाणामाख्यानं रघुवंशे वर्तते। रघुवंशीयानां नृपाणामेतादृशं संयतं संक्षिप्तं प्रभावपूर्णं च वर्णनमन्यत्र कस्यापि काव्ये नोपलभ्यते। रघुवंशे त्रयः सर्गाः दिलीपविषयका विलसन्ति। तेषु रघोः प्रादुर्भावस्य भूमिका कविना विनिर्मिता। रघोर्महिमा रघुवंशमित्याभिधानेन विख्यातम्।

### २. कुमारसम्भवमहाकाव्यम्।

अस्मिन् महाकाव्ये सप्तदश सर्गाः सन्ति। कुमारसम्भवकथायाः प्रमुखतयोपजीव्यं महाभारतमस्ति। धातुः वरं प्राप्य तारकासुरनामको राक्षसो दैत्यानामधिपतिर्बभूव। सः सुरान् पराजित्य तान् पीडयामास। पीडिताः देवाः ब्रह्मणः समीपे अगमन्। ब्रह्मा देवानकथत् यत् भगवतः शिवस्य पार्वत्यां जातः पुत्रोऽस्य हन्ता भविष्यति। तदनन्तरं देवाः प्रयत्नं विधाय शङ्करस्य पाणिग्रहणसंस्कारं पार्वत्या साकं कारयामासुः। भगवतः शङ्करस्योमायामेकः पुत्रः स्वामीकार्तिकेयनामकः उत्पन्नो बभूव। सैव देवासुर सङ्ग्रामे देवानां सेनापतिर्जातः। स्वामीकार्तिकेयैव ससैन्यस्य तारकासुरस्य वधं कृतवान्। महाकवेः कालिदासस्य प्रतिभया प्रातिभं कथाया वर्णनमस्मिन् कुमारसम्भव महाकाव्ये वर्तते।

## ३. मेघदूतम् ।

मेघदूतं काव्यं मन्दाक्रान्ताछन्दसि रचितं विश्वसाहित्यस्य सर्वाधिकं मधुरं गीतिकाव्यं वर्तते। मेघदूतस्य द्वौ भागौ वर्तते – पूर्णमेघः, उत्तरमेघश्च।

अस्मिन् खण्डकाव्ये कालिदासेनातिशयमनोरमं सततसञ्चरणशीलं मेघं दूतरूपेणोपकल्प्य

मानवोचिताः प्रवृतयस्तस्य प्रकल्पिताः। कवीन्द्रः रवीन्द्रेण मेघदूते कालिदासस्योत्कृष्टप्रतिभा प्रमाणीकृता भारते तेषु तेष्वानन्दोत्सवेषु बहवः क्षणिकसाहित्यरूपमृद्दीपकाः अर्धरात्रे स्वकार्यं निर्वत्य स्मृतिलोके विलीनाः। सर्वप्रथमं यः स्वर्णदीपको दृश्यते तदस्ति कालिदासस्यैव काव्यम्। पैतृकोऽयं प्रदीपोऽद्यापि गृहानस्माकम्। यो रत्नदीपः उज्जयिनीवासि पितामहस्य प्रासादशिखरं द्योतयति स्म, सोऽद्यापि निष्कलुषः केवलमात्रमानन्दहेतु काव्यं संस्कृतसाहित्ये सर्वप्रथमं कालिदासेनैव कृतमित्यस्माकमभिप्रायः अस्मिन् गीतिकाव्ये उभयोः भागयोः स्वप्रियतमातो विश्लिष्टस्यैकस्य यक्षस्य विरहाभिव्यक्तिर्वर्णिता वर्तते।

## ४. ऋतुसंहारम् ।

महाकविः कालिदासस्य प्रारम्भिकरचनासु ऋतुसंहारमेव लघुकाव्यमनवलुप्तं विद्यते। प्रारम्भिककृतित्वात् कवेर्नातिदीर्घरचनाभ्यासाच्च मेघदूताभिज्ञानशाकुन्तलादि सदृशं श्रेष्ठं नेदं काव्यं वर्तते। अस्मिन् काव्ये महाकविः कालिदासः षण्णाम् ऋतूनां षट्सु सर्गेषु विभज्य मनोज्ञं वर्णनं कृतवानस्ति। काव्यस्य प्रथमेसर्गे ग्रीष्मर्तोः वर्णनम्, द्वितीय सर्गे वर्षर्तोः वर्णनम्, तृतीयसर्गे शरदो वर्णनम्, चतुर्थसर्गे हेमन्तवर्णनम्, पञ्चमसर्गे शिशिरवर्णनम्, षष्ठे च सर्गे वसन्तर्तोः वर्णनं कृतमस्ति। अस्मिन् काव्ये प्रकृतिसंस्कृत्योः समन्वयैव महाकवेः प्रयोजनमिति प्रतिभाति।

## ❖ नाटकानि ।

## १. अभिज्ञानशाकुन्तलम् ।

अभिज्ञानशाकुन्तलस्योपजीव्यं महाभारतीयं दुष्यन्त – शकुन्तलयोराख्यानं वर्तते। परञ्च कालिदासः स्वप्रतिभाबलेन तथाविधानि परिवर्तनानि सन्निवेशमयानि चकार येन दुष्यन्त – शकुन्तलयोः चरित्रमतीवोदात्तम् जातम्। सप्तभिरङ्कैः समन्वितमिदं नाटकम्।

नाटकेऽस्मिन् प्रधानरूपेण दुष्यन्तशकुन्तलयोः प्रणयगाथा वर्तते। नाटकस्य सर्वैर्लक्षणयुक्तमिदं नाटकं समग्रस्य संस्कृतसाहित्यस्य निधिरिव वर्तते।

## २. विक्रमोर्वशीयम्।

विक्रमोर्वशीयं कालिदासस्य द्वितीयं नाटकमस्ति। महाकवेः कालिदासस्य नाटकेषु विक्रमोर्वशीयमन्यतमं वर्तते। अस्य नाटकस्योपजीव्यम् ऋग्वेदस्य पुरूरवोर्वशी संवादो वर्तते। अस्य नायकः पुरूरवाः स्व विक्रमेण नायिकामुर्वशीं प्राप्तवान्। अस्मिन् नाटके महाकविः कालिदासः पुरूरवोर्वशीसंवादे महत् परिवर्तनं कृत्वा तस्यातीव मनोज्ञंरूपमददत्।

स्वाश्रयदातुः राज्ञो विक्रमस्य नामान्वेतुमेव कालिदासः पुरूरवोर्वशीयमिति नाम्नः स्थानेऽस्म

नाटकस्य विक्रमोर्वशीयमिति नामाकार्षीत्।

## ३. मालविकाग्निमित्रम्।

अस्मिन् नाटके शुङ्गवंशीय नरपतेरग्निमित्रस्य मालविकायाश्च प्रेमकथोऽपनिबद्धाऽस्ति। एतयोरेव नायकनायिकयोर्नाम्ना नाटकस्य नामकरणरमपि कृतमस्ति। अत्र पञ्चाङ्काः सन्ति। पात्रचारित्र्यचित्रणदृश्ट्या भाषाशैलीदृष्ट्या च कालिदासस्य रूपकेषु प्रथमाकृतिर्नाटकमिदमित्यत्र न कोऽपि सन्देहः।

मालविकाग्निमित्रस्य भाषा प्रसादपूर्णा मनोहरा चास्ति। अत्र कुत्रापि क्लिष्टता कृत्रिमता वा नानुभूयते। कालिदासस्य सर्वेषु नाटकेषु अग्निमित्रो निकृष्टश्रेणिको विद्यते।संस्कृतग्रन्थलक्षणानुसारं स धीरललितो नायकोऽस्ति। रघुवंशीयाग्निमित्र इव स राज्यकार्ये निश्चिन्तो नास्ति,तथापि तस्मिन् शौर्यधैर्यादिगुणानां सद्भावो नैव दृश्यते। नाटकेस्मिन् येन केनापि प्रकारेण मालविकाविकावशीकरणमेवैकात्रं तस्योद्देश्यं सर्वथा संलक्ष्यते।।

## (३) तत् वर्णितविषयाणामुल्लेखः।

महाकवि कालिदासस्य ग्रन्थानां विभागत्रयं समुपलभ्यते। महाकाव्यम्, काव्यम्, नाटकञ्च।

- महाकाव्यम्— यथा – रघुवंशमहाकाव्यम्, कुमारसम्भवमहाकाव्यञ्च।
- काव्यम् – यथा– मेघदूतम्, ऋतुसंहारमञ्च।
- नाटकम् – यथा– अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्।

एषु ग्रन्थेषु वर्णितविषयामुल्लेखोऽत्र समासेन क्रियते।

### १.रघुवंशमहाकाव्यम्।

रघुवंशं कुमारसम्भवात् पूर्वमेव विरचितं तथापि काव्यगुणोत्कर्षैः साहित्यरसिकजनानां हृदये सदा विलसति। अत्र प्रत्येकसर्गाणां कथा संक्षेपेण वर्ण्यते।

- प्रथमसर्गे इक्ष्वाकोः वंशे उत्पन्नो राजा दिलीपः सन्तानरहितत्वात्, सन्तानविषये चिन्तितो स्वपत्न्यासुदक्षिणयासह महर्षे वसिष्ठस्याश्रमे जगाम। महर्षिः सन्तानहीनतायाः कारण ज्ञात्वा, पुत्रप्राप्यार्थं तस्यैव आश्रमे स्थिता कामधेनोपुत्री नन्दिन्याः सेवा कर्तुमाज्ञायत्।
- द्वितीयसर्गे नन्दिन्याः सेवाव्रतपरायणद राजा दिलीपः तस्याः परिचर्यायां व्यापृतो बभूव। राजा दिलीपः सश्रद्धं नन्दिन्याः सेवां करोति। यदा राजा नन्दिन्याः परीक्षायामुतीर्णो भवति तदा प्रसन्ना भूत्वा नन्दिनी वदति – **"प्रसन्नाया मम दुग्धं पत्रपुटके दुग्ध्वापिव। ते सन्ततिर्भविष्यतीति।"** राजा निवेदयति महर्षेराज्ञया तस्यापयः पातुमिच्छामीति। तदनन्तरं वनात् प्रतिनिवृत्य राजा महर्षेराज्ञया नन्दिन्या दुग्धं पित्वा सुदक्षिणया साकं स्वराजधान्यां गच्छति।
- तृतीयसर्गे – नन्दिन्याः वरदानस्य फलस्वरूपं दशमे मासि पुत्ररत्नजजीजनत्। बालकस्य नाम रघुरिति निर्धारितम्। सर्वैः क्षत्रियोचितैः सस्कारैः सम्पन्नो रघुः लब्धविद्यः सन् अल्पे एव वयसि महान् धनुर्धरो बभूव। महाराजा दिलीपः तं युवराजपदेऽभिषिञ्च्य, जीवनस्यान्तिमकाले राजाऽश्वमेघयज्ञानामनुष्ठाने दीक्षितो बभूव। राज्ञो दिलीपस्य शततमस्याश्वतेधस्याश्वम् इन्द्रः जहारः। रघु महेन्द्रयोः महद्युद्धमजायत। रघोः पराक्रमेण प्रसन्न इन्द्रः रघोः कथनानुसारेण वरं दत्वा अन्तर्धानं गतः। विजयिनं पुत्रमभिनन्द्य राजा यज्ञं समाप्य रघुं राजानं कृत्वा साकं तपश्चर्तुं वनं प्रविवेश।

- चतुर्थसर्गे – राजा रघुः दिग्विजयाय प्रस्थितवान्। सर्वप्रथमं सुह्यान् बङ्गान् च पराजित्य रघुः गंगायाः तटेषु स्वविजयस्तम्भं स्थापयामास। दक्षिणदेशे कलिङ्गान् च पराजित्य बाल्हीकदेशे गत्वा रघुः हूणान् पराजितवान्। अन्ते लौहित्यनदीमुत्तीर्य कामरूपदेशस्य राजधानीं प्राग्ज्योतिषपुरमगमत्। तत्रत्यो राजा रघोः स्वामित्वं स्वीकृत्य गजदलमेकं तस्मै उपहाररुपेण प्रादात्। अत्रैव रघोः दिग्विजययात्रा पूर्णा भवति। दिग्विजयी रघुः कदाचित् कालिदासस्यादर्शः आसीत्। दिग्विजयव्याजेन सम्पूर्णभारतस्य तेषु तेषु वर्णनेन राष्ट्रियैक्यनिष्पादनं कवेरभिष्टमनुमीयते।

- पञ्चमसर्गे– वरतन्तुशिष्यः कौत्सस्य गुरुदक्षिणावृतान्तो वर्णितः। रघुः पिश्वजिद्यागं कृत्वा सर्वस्वं दाने अददत्, तदात्वे छत्रं राजदण्डं च विहाय रघोः पार्श्वे किमपि नासीत्। तथाऽपि कौत्सकृते दानतपबलेन सः गुरुदक्षिणायाःप्रबन्धमकरोत्। अन्ततः कौत्सस्य शुभाशिषा सोऽजाख्यं पुत्रं प्राप्तवान्। अजोऽपि विद्याशौर्यपराक्रमादिविषये स्व पितृतुल्यः आसीत्। युवावस्थायामजो विदर्भराजतनयायाः इन्दुमत्याः स्वयम्वराय प्रस्थितवान्। मार्गे रेवारोधसि स विशालं वन्यं गजं जघान। स च गजो गन्धर्वत्वेन परिणतः। अजस्तस्मात् सम्मोहनं नामास्त्रं प्राप्तवान्। ततः अजः स्वसैन्येन सह विदर्भं जगाम। यत्र विदर्भाधिपतिः तं ससम्मानं पूजयामास।

- षष्ठमसर्गे– विदर्भे इन्दुमत्याः स्वयम्वरसभा आयोजिताऽऽसीत्।समग्रभुमण्डलस्य प्रमुखाः राजानस्तत्र समुपस्थितारासन्। यदा सख्या सुनन्दय साकम् इन्दुमती स्वयंवरे वरमाला स्वीकृत्य प्रविवेशतदा सर्वैः नृपाः सतृष्णैर्नेत्रैस्तामवलोकयामासुः। सुनन्दा इन्दुमतीम् सर्वेषां राजानां परिचयं दत्तवती। इन्दुमती च सर्वान् राज्ञः अतिक्रम्य यदा अजस्य समक्षमागतवती तदा सा समुद्र मवाप्य नदीव गतिशून्या तथैव तस्थौ। सा सुनन्दयोपस्थाप्यमानं परिचयं श्रुत्वा अजस्य ग्रीवायां वरमालामर्पितवती।

- सप्तमसर्गे – स्वराजधान्यां प्रतिनिर्वतमानस्याजस्य सर्वैः राजभिः साकं युद्धमभवत्, राजधानश्च तेन पराजिताः। भूयः तान् नृपान् क्षमां कृत्वाऽजः इन्दुमत्या सह अयोध्यामायातिस्म। रघुः राज्यभारमजेन्यस्य प्रव्रज्यां जग्राह।

- अष्टमसर्गे रघोर्मृत्यर्वर्णितः। अजस्य पुत्रो दशरथो बभूव। एकस्मिन्नहनि उद्याने आकाशमार्गेण गच्छतो नारदस्य वीणातः इन्दुमत्याः हृदये मालापतनसमकालमेवेन्दुमती मृतीं जगाम। इन्दुमत्याः मृतिं दृष्ट्वा महाराज अजः करुणं विललाप। अजविलोपन सर्गोऽयं समाप्तिं गतः।

- नवमसर्गे – वंशपरम्परानुसारेणैव दशरथः अयोध्यायाः शासकोऽभवत्। एकदा सः आखेटेन विहर्तुमरण्ये जगाम्। रात्रौ जलाहरणशब्दं श्रुत्वा वनीयं दन्तिनं मत्वा शब्दवेधिना वाणेन प्रहारं चकार। हा पित! हा मात! इति शब्दं श्रुत्वा मनुष्यं ज्ञात्वा राजा तस्य पार्श्वे जगाम। स मुनिकुमारः श्रवणकुमारः आसीत्, सर्वं खलु राजा कुमारमुखेन ज्ञातवान्। राजा दशरथः अन्ध्योस्तापसयोः कृते जलमादाय यदा आजगाम तदा राजानं स्वपुत्रहन्तारं ज्ञात्वा तापसौ तौ राज्ञे पुत्रवियोग एव प्राणानां परित्यागाय शापं ददतुः, तौ स्वर्गलोकम् जग्मतुः।
- दशमसर्गे – अयोध्यायां शासनं कुर्वन् राज्ञो दशरथस्य दशसहस्रवर्षाणि व्यतितानि। परन्तु

राजा दशरथो निस्सन्तान एव आसीत्। ऋष्यश्रृङ्गस्याध्यक्षतायां पुत्रेष्टि यागमभूत्। अग्नेः चरुप्रसादकृपया महाराजस्य तिस्त्रः पत्नयः अन्तर्वत्नय अभूवन्। समयागते रामः, लक्ष्मणः, भरतः, शत्रुघ्नश्च चत्वारः पुत्राः अभूवन्। महर्षेः वशिष्ठस्याश्रमे इमे चत्वारः राजकुमाररः विद्याभ्यासं प्राप्तवन्तः। अत्र दशमसर्गः सम्पूर्णतां याति।

- एकादशसर्गे – एकदा महर्षिः विश्वामित्रः स्वयज्ञ रक्षार्थं श्री रामं याचितवान्। महर्षेः प्रभावेण प्रभावितो राजा दशरथः श्री रामलक्ष्मणै तेन सह प्रेषितवान्। मध्ये मार्गे ताटकां हत्वा ऋषेः आश्रमं गत्वा अनेकान् राक्षसान निहत्य यज्ञरक्षां चकार। मिथिलायां श्री रामः धनुर्भङ्गं कृतवान्। तत्रैव चतुर्णां भ्रातृणां विवाहां जातः। राजा दशरथश्च पुत्रैः पुत्रवधूभिश्च साकं स्वराजधानीं प्रविवेश।
- द्वादशसर्गे – महाराजोः दशरथः श्री रामे सर्वविद्यां योग्यतां दृष्ट्वा तं युवराजं कर्तुं ऐच्छत्। किन्तु कैकेयी रामस्यकृते चतुर्दशवर्षाणां वनवासम्, स्वपुत्रायभरताय राज्स्याधिकारं वरदानरूपेण ययाचे। श्री रामः सीतालक्ष्मणाभ्यां सह वनं जगाम। पुत्रवियोगेन महाराजो दशरथः प्राणान् तत्याज। वने सीतायाः अपहरणं जातः, पम्पासरोवरे सुग्रीवेण सह श्री रामस्य मैत्री सञ्जाता। सुग्रीवस्य वानराणां च सहायेन लङ्कां गत्वा रावणं युद्धे हतवान्।
- त्रयोदशसर्गे–श्री रामः सीतालक्ष्मणाभ्यां साकं अयोध्यां प्रत्यागच्छन्। पुष्पकविमानेन मध्यमार्गं स्थितानि तानि तानि स्थानानि समुद्रं च प्रदर्शयन् सीताम् अयोध्यामगात्।
- चतुर्दशसर्गे– रामराज्यसमारम्भः सम्पन्नो बभूव। कालानन्तरं सीता गर्भवती बभूव। सा च गंगातटस्य तपोवनानि द्रष्टुं दोहदमियेष। इतश्च प्रजा सीतायाः पुनर्ग्रहणं नानुमोदत इति रामो भद्राख्यसूचकेन सूचितः। रामः सीतां वने परित्यक्तुं लक्ष्मणमादिष्टवान्।

लक्ष्मणश्चैवं विहीतवान्। सूवनां प्राप्य सीतायाः रक्षायैः वाल्मीकिस्तत्र प्राप्तवान्। वाल्मीकिः रामस्य तत्कृत्यं भर्त्सयन्सीतां पुत्रीवत् ररक्ष। पश्चात् अयोध्यायांरामोऽश्वमेधं प्रारभत। अत्र समाप्तिं गच्छति चतुर्दशसर्गः।

- पञ्चदशसर्गे–रामेणनियोजितः शत्रुघ्नो मथुरां गतः, तत्र ऋषिसन्तापकं राक्षसं लवणासुरं विनाशयामास शत्रुघ्नः। वाल्मीकेराश्रमे निवसन्ती सीता द्वौ पुत्रौ जनयामास। वाल्मीकिलर्वकुशयोः संस्कारादिकं सम्पाद्य ताभ्यां रामायणगानमुपदिदेश। कुशलवौ श्री रामाश्वमेधंद्रष्टुं महर्षिणा साकमागतम्। श्री रामः तयोमुर्खात् स्वकीयां वीरगाथां शुश्राव। वाल्मीकिस्तं सतनयां सीतां स्वीकर्तु समादिदेश। राम आह–'सीता शुद्धास्ति लोकाः न विश्वसिति,यद्यसौ प्रजासमक्षं स्वशुद्धिं प्रमाणयेत् तर्हि स्वीकुर्यामिति।' महर्षिः वाल्मीकिः सीतासमक्षं प्रस्तावमेनमुपस्थापयामास। सीता उवाच–"मात पृथिवी, यद्यहं शुद्धां स्यां तर्हि धारय माम्।" तत्क्षणं पृथिवी विदीर्णा सीतां स्वाङ्के समारोप्यान्तर्हिता। कालान्तरे रालक्ष्मणादयःदिवंगताः।

- षोडससर्गे– कुशोऽयोध्यायाः अधिष्ठात्रीं देवीं नगर्या दुर्दशां वर्णयन्तीं स्वप्ने ददर्श। सः कुशावतीं श्रोत्रीयेभ्यः प्रदाय अयोध्यामगात्। सः अयोध्यायाः पुनर्निर्माणं चकार।

- सप्तदशसर्गे– अयोध्यायाः नृपाणां वैभवविलासानां च मनोज्ञतमं वर्णनं विद्यते। कुशपुत्रोऽतिथिः
राजपदमघिष्ठतः।

- अष्टादशसर्गे– निषध–नल–नभ–पुण्डरीक–ध्रुवसन्धि–सुदर्शनादिनृपाणां वर्णनं प्राप्यते।

- एकोनविंशतिसर्गे–सुदर्शनतनयोऽग्निवर्णो राजपदं लेभे। विलासपरायणः सः अन्तकाले क्षयरोगेण ग्रस्तः सन् मृतिं लगाम् कावयमिदमत्रैव समाप्तिं याति। रघुवंशस्याख्यानपरिधिर्नितरां विशाल इत्युपर्युक्त विवरणेन सुष्पष्टम्। आख्यानतत्त्वस्यैतादृशं वैविध्यम् अन्यकाव्येषु विरलमेव। अस्मिन् महाकाव्ये देवमानवराक्षसाः पशुपक्षिणश्च विचरन्तो दरीदृश्यनते,यैश्च कविना सहानुभूतिमयपरिचयः प्रकटितः।

- उपजीव्यता – रघुवंद्दा सारभागो रामाख्यनम् वर्तते। अनुमीयते यत् रघुवंशीयं रामाख्यानं वाल्मीके रामायणकथामनुसरति। अपरेषां राज्ञांकथा कालिदासेन कृतः समानीतमिति कुत्राऽपि सम्यक्तया नैव प्राप्यते। कालिदास युगे रघुवंशस्य

किञ्चिदुपजीव्यमासीद्यस्यानुसारं भासेनाधोलिखितमुपवर्णितम्। यथा – 'रघुरिव स नरेन्द्रो यज्ञविश्रान्तकोशः' इति – प्रतिमा ना. (४/१०)

## २. कुमारसम्भवम्।

कालिदासस्य चारुतरं काव्यं कुमारसम्भवं विजयते। अस्मिन् काव्ये मुख्यतया पार्वती – शिवयोः प्रणयानुबन्धेन स्कन्दकुमारस्य जन्मकथायाः वर्णनं वर्तते। कुमारसम्भवमहाकाव्यस्य क्रमशः सर्गानुक्रमेण कथा नीचैर्मल्लिखितो वर्तते समासेन।

- प्रथमसर्गे प्रथमं तावत् हिमालयस्य वर्णनं वर्तते। हिमालयस्य कैलाशनाम्नि पर्वते शिवस्य वासो विद्यते। अस्मिन्नेव सर्गे पार्वत्याः जन्मो भवति। हिमालयस्य मनोज्ञासु गुहासु यक्षिण्यः विद्याधर्यः देवाङ्गनाश्च निवासं कुर्वन्ति। पार्वती देवबालाभिः साकं तत्र शिवार्चानां कर्तुं पुष्पावचयं करोति।

- द्वितीयसर्गे तारकासुरेण पीडिताः दिवौकसाः ब्रह्मणस्समीपे जग्मुः। ब्रह्मा उवाच यत् ममैव वरदानेन तारकासुरः वर्धितोऽस्ति। तस्य विपरीतं किमपि कर्तुमसर्थोऽस्मि। भवद्भिः शिवपार्वत्योः विवाहः सम्पादनीयः। तयोः पुत्र एव तस्य वधं करिष्यतीति।

- तृतीयसर्गे मदन दहनस्य कथा वर्तते। कामदेव इन्द्राज्ञया रतिमादाय कैलाशपर्वते गत्वा
शिवस्य हृदये काममुत्पन्नं कर्तुं चेष्टतेस्म। भगवान् शङ्कर अपश्यत् यत् समक्षमेव कामदेवः कार्मुक
आरोपितबाणो वर्तते। तद् दृष्ट्वा क्रोधाभिभूतः शङ्करः स्वतृतीयं नेत्रमुद्घाट्य तं भष्मं चकार।

- स्वपतिं भस्मसाद् भूतम् अवलोक्य रतिः विलापम् अकरोत्। कामदेवस्य सहचरैः सान्त्वयमानाऽपि रतिः स्वदेहत्यागं कतुमियेष। तस्मिन्नेव समये व्योमवाणी अभवत् यत् भगवान् शिवः पार्वत्याः पाणिग्रहणमवश्यं करिष्यति, तदा सो भगवान् मदनं पुनर्जीवितं कारिष्यति। अत एव तावत्
समयपर्यन्तं भवत्या धैर्यमवलम्बनीयमिति।

- पञ्चमसर्गे भगवता शिवेन कृतं कामदहनं विलोक्य पार्वती निराशा जाता। पितुराज्ञां प्राप्य सा शिवं पतिरूपेणाधिगन्तु तपश्चर्यां चकार। पार्वत्या साधनां दृष्ट्वा भगवान् आशुतोषः ब्रह्मचारिवशं कृत्वा पार्वत्याः समीपे अगच्छत्। अतीथेः सत्कारानन्तरम्,

ब्रह्मचारीरूपधरः शङ्करः स्वकीयं वास्तविकं रूपं प्रदेर्शयन्नाहदेवि तव साधनया प्रसन्नोऽस्मि। तवेच्छा पूर्ति भविष्यतीति।

- षष्ठमसर्गे भगवान् शिवः अङ्गिराप्रभृतयः सप्तर्षीन् हिमालयस्य समीपे प्रेषितवान्, विवाहस्य प्रस्तावं नीत्वा। हिमालयः स्वपत्न्याः सह परामर्श कृत्वा सप्तर्षीणां प्रस्तावं स्वीकृतवान्।

- सप्तमसर्गे शुभलग्ने शिवपार्वत्योः विवाहो जातः। स्वकीयानां गणानां देवानां च हिमालयस्य गृह वरयात्रिकामादाय शिवः अगच्छत्। तत्र महतोत्साहेन सह शिवस्य विवाहोत्सवः सम्पन्नो बभूव।

- अष्टमसर्गे उमायाः साकं विवाहं विधाय भगवान् शिवः तया सह कैलासमागच्छत्। तत्र दाम्पत्यासुखस्यानुभवं कृतवान्।

- नवमसर्गे – यदा शिवपार्वत्यौ क्रीडास्तौ आस्ताम्। तदैव इन्द्रः अग्निं पारावतवेषेण तयोः समीपे प्रेषयामास। भगवान् शिवः क्रोधितः अभवत्। इन्द्रस्य सन्देशं श्रुत्वा लोकमङ्गकामनया स्वशुक्रम् अग्नौ स्थापितवान्। यदा अग्निः वीर्यस्य ज्वालां सोढुमसमर्थो जातः तदा सः शक्रस्यादेशेन तच्छुक्रं स्वर्गङ्गायामत्यजत्।

- दशमसर्गे–गंगा शुक्रस्यतेजः सोढुमसमर्था सा स्नानार्थं समागतानां षण्णां कृतिकानां शरीरे स्थापयामास। तारपि सोढुमसमर्थाः तद्वीर्य वेतसवने तत्याज।

- एकादशसर्गे–व्योममार्गेण गच्छतो शिवपार्वत्योः दृष्टिः वेतसवने स्थिते शिशौ पपात। तं बालकं निजशुक्रसम्भवं मत्वा स्वगृहम् आनयामासुः। सः बालः स्वल्पकालैव सर्वासु शस्त्रास्त्रविद्यासु प्रविणो जातः। सः कुमारस्य नाम्ना प्रसिद्धो बभूव।

- द्वादशसर्गे– भगवान् शंकरः इन्द्रस्य प्रार्थनया कुमाराख्यं स्वपुत्रं देवसेनायाः सेनापतिं चकार।

- त्रयोदशसर्गे–शिवपार्वत्योः आदेशेन युद्धार्थं कुमारः प्रस्थानं करोति।।

- चतुर्दशसर्गे– देवसेनायाःप्रस्थानस्य विशदवर्णनं वर्तते।

- पञ्चदशसर्गे–द्वयोः पक्षयोः युद्धवीराः सम्मुखे आगच्छन्ति।

- षोडशसर्गे–युद्धवर्णनं वर्तते।

- सप्तदशसर्गे–कुतारः तारकासुरस्य वधं करोति, तथा इन्द्रः पुनः स्वर्गस्य शासकः भवति।

भाषासौष्ठवालंकृतशैली,तथा श्लाघ्यरसपरिपाकजन्यविविधवैशिष्ट्यातिरिक्तं श्रोतृपाठकयोः कृते यन्महदाकर्षकं वैशिष्ट्यमस्मिन् काव्ये प्रतीयते तदस्यानुपमप्रकृतिवैशिष्ट्यम्। प्रथमं कविः प्रकृतिनिरीक्षणं करोति, तत्र सूक्ष्मतमतत्वानि दृष्ट्वा आकृटश्च भवति। अनन्तरं स प्रकृतेःप्रत्येकवस्तुनः पृथक–पृथक परिगणनमकृत्वा सर्वाणि एकीकृत्य संश्लिष्टवर्णनमुपस्थापयति।

## ३. मेघदूतम् (खण्डकाव्यम्)।

महाकवेः कालिदासस्य सुप्रथितं "मेघदूतम्" खण्डकाव्यमस्ति। समालोचकैः साहित्यमर्मज्ञैः विद्वद्भिरिदं हि गीतिकाव्यत्वेनापि स्वीकृतमस्ति। मन्दाक्रान्ताछन्दसि निबद्धमिदंकाव्यं विश्वसाहित्यस्य सर्वाधिकं मधुरं गीतकाव्यं वर्तते। मेघदूतस्य द्वौ भागौ स्तः, पूर्वमेघः, उत्तरमेघश्च। उभयोः भागयोः स्वप्रियतमातः वियोगि यक्षस्य विरहाभिव्यक्ति वर्णिता वर्तते। मेघदूतस्योभयोः भागयोः कथा समासेन निम्नप्रकारेण वर्तते। अलकाधिपतेः कुबेरस्यानुचरः एको सेवकः नीज–उत्तरदायित्वनिर्वणे प्रमादग्रस्तो बभूव। क्रुद्धः कुबेरः तस्मै एकवर्षकृते स्वनगरात्निर्वासनस्य दण्डं प्रादात्। शापग्रस्तो यक्षः स्व नवविवाहितायाः प्रियतमाया एकस्मै वर्षाय वियुक्तो भवति। सः स्वकीयां नगरीं अलकापुरीं विहाय रामगिरौ वासं वकार। यथा–

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः,**

**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु,**

**स्निग्धच्छायातरुषुवसतिं रामगिर्याश्रमेषु।।**[१]

कतिपयमासानुषित्वा तत्र यक्षः आषाढस्य प्रथमदिवसे आश्लिष्टसानुं वप्रक्रीडापरिणतंगजम् इव मेघं ददर्श। सः कुटजपुष्पार्घ्यं समर्प्य मेघं प्रति निवेदयति–यत् मत्प्रियतमायै अलकापुरीं सन्देशं त्वं नयेति। यक्षो मेघं अलकापुरीगमनं निर्देशति, मध्यमार्गे विद्यमानानां देशानाम्, नदीनाम्, नगराणाम्, पर्वतानाञ्च साहीत्यिकं वर्णनं सम्यक् उपलभ्यते। अत्रैव पूर्वमेघः पूर्णतां गच्छति।

---

१. मेघदूतम् – १/१,

दत्तरमेघे अलकापुर्याः मनोरमं वर्णनं वर्तते। यक्षः अवदत् यत् अलकापुर्यां कुबेरस्य भवनात् उत्तरस्यां दिशायां मम गृहं वर्तते। यथा–

**तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं,**

**दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।**

**यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे,**

**हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः।।**[१]

यक्षः कथयति–सखे मेघ,मम तत्र अलकापुरीमासाद्य स्वप्नेमामनुध्यायनतीं मत्प्रियां कृपया विघ्नितमनोरथां मा करोतु ।

मेघदूतकाव्यपरिशीलनेनेदं वक्तु शक्यते यदपूर्ववर्णननैपुणी, वस्तुविकासिनीं च काव्यप्रतिभा कालिदासस्य असामान्या वर्तते। प्राचीनकालतः मेघदूतस्य पठनपाठनयोः महान्प्रचारो वर्तते। अस्य बहवः टीकाः समुपलभ्यन्ते। प्रौढकल्पना–विलक्षणभाषशैली–चमत्कारपूर्णालंकारप्रयोग–प्रकृतिचित्रण–गेयत्वादि विविधदृष्ट्या पर्यावरणदृष्ट्या च परमाह्लादकं नाम मेघदूतकाव्यमस्ति। भूगोलज्ञानार्थमपि मेघदूतस्य विशिष्टं महत्त्वं वर्तते। अत्र हि कालिदासकालिकस्य भारतवर्षस्य भौगोलिकस्थितेर्ज्ञानं भवतीति।।

## ४. ऋतुसंहारम्।

ऋतुसंहारकाव्यं कालिदासस्य प्रथमा काव्यकृतिरस्ति। तस्य काव्यकलायाः प्रारम्भोऽस्मादेव ऋतुवर्णनपरकलघुकाव्यादभूदिति विदूषां मतम्। षट् सर्गात्मकं ऋतुसंहारं नाम गीतिकाव्यं महाकविः कालिदासनोद्यत्तारुण्ये कदाचिद् विरचितमिति प्रतीयते। अत्र षट्सु सर्गेषु प्रतिसर्गमेकेषामृतुनां वर्णनं दृश्यते। प्रथमसर्गे ग्रीष्मवर्णनं। यथा–

**प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः, सदावगाहक्षतपारिसञ्चयः।**

**दिनान्तरेभ्योऽभ्युपशान्तमन्मथो, निदाघकालोऽयमुपागतः प्रिये।।**[२]

अनेन श्लोकेन महाकविः ग्रीष्मर्तोः वर्णनमुपस्थापयन् कथयति यत् साम्प्रतं सूर्यो भृशं तपति, चन्द्रस्य चन्द्रिका अतीव सुखमयी अनुभूयते। जनाः दीर्घकालपर्यन्तं स्नानं

१. मेघदूत– २/१२, २. ऋतुसंहार –१/१

कुर्वन्ति, तेन सञ्चितस्यापि जलस्य भण्डार अपचीयते।अस्मिनृतौ सायंकालो रमणीय आभाति।कामोद्वेगोऽपि शान्तिं गतो वर्तते,समेषां जनानाम्।

वषर्तौ तावन्मेघाः शनैः शैराकाशं निबिडमाच्छादयन्ति।अधोऽधो विलम्बिनश्च ते गिरिभूमीश्चुम्बितुकामा इवालोक्यन्ते। इदानीं च काले कामिषु कामः कृतजीवनरससेक इव जलदैर्भवति। निम्नश्लोके वर्षर्तो वैभवस्य वर्णनंसमुपस्थापयन् वक्ति महाकविः।यथा–

**वहन्ति वर्षन्ति नदन्ति भान्ति,**

**व्यायन्ति नृत्यन्ति समाश्रयन्ति।**

**नद्यो घनाः मत्तगजाः वनान्ताः,**

**प्रिया विहीनाः शिखिनः प्लवङ्गाः।।**[१]

साम्प्रतं सर्वा नद्यो वहन्ति वर्षायाः जलेन परिपूर्णत्वात् मेघाः गर्जन्ति,मदमत्ताः गजाः नादं कुर्वन्ति, वनप्रदेशाः देदिप्यमानाः सन्ति, मयूराः नृत्यन्ति,मर्कटाश्च स्वाश्रयं समाश्रयन्ति। महाकविः कालिदासःवर्षर्तोः वर्णनानन्तरं शरदृतोः वर्णनं करोति। यथा–

**काशांशुका विकचपद्ममनोज्ञवक्त्रा,**

**सोन्मादहंसरवनूपुरनादरम्या।**

**आपक्वशालिरुचिरा नतगात्रयष्टि :,**

**प्राप्ता शरन्नववधूरिवरूपरम्याः।।**[२]

अत्र महाकविः शरदृतोः वर्णनं नायिकारुपेण करोति, सः कथयति इयं शरदृतुः वधूरिव वर्तते। अस्याः वधोः विकसितकाश एव वस्त्रम्, विकसितानि कमलानि एव मुखमण्डलम्,हंसानां लरव एव युवजनमोहनविद्यैव अस्याः शरन्नायिकायाः मञ्जीरध्वनिः, परिपक्वशालीपीतवर्णमेवास्याः रूपधनम्। चतुर्थसर्गे महाकविः हेमन्तर्तोः वर्णनं कुर्वन्कथयति। यथा–

**नवप्रवालोद्गमसस्यरम्यः, प्रफुल्ललोध्रः परिपक्वशालिः।**

**विलीनपद्मः प्रपतत्तुषारो, हेमन्तकालः समुपागतोऽयम्।।ऋतु.४/१।।**

१. ऋतुसंहार – २/१९, २. – ३/१

SMT. HANSA MEHTA LIBRARY
MAHARAJA SAYAJIRAO UNIVERSITY

अर्थात् अस्मिनृतौ गोधूमेत्यादिकानि सस्यानि अंकुरितानि भवन्ति, अत एवास्य ऋतोः रम्यता जायते। शालयोऽपि परिपक्वाः संजाताः, तुषारपतनेन कमलपुष्पाणि सरस्सु नावलोक्यन्ते, एतादृशोऽयं हेमन्तकालः समागतः। पञ्चमसर्गे शिशिरर्तोः मनोहारिवर्णनं यथा–

निरुद्धवातायनमन्दिरोदरं, हुताशनो भानुमतो गभस्तयः।

गुरूणिवासांस्यबलाः सयौवनाः, प्रयान्ति कालेऽत्र जनस्य सेव्यताम्।।[१]

अत्र महाकविः शिशिरस्य वर्णनं कुर्वन् पुरुषैः सेव्यमानानां वस्तूनां करोति। यथा – पिहीतगवाक्षभवनम्,अग्निः,सूर्यरश्मयः, गुरूणिवस्त्राणि, युवतयश्च। अस्मिन् शिशिरकाले एतेषामेव वस्तूनां सेवनं भवति सुखप्रदं पुरुषेभ्य इति। अस्य काव्यस्य अन्तिमसर्गे वसन्तर्तोः वर्णनं कुर्वन् महाकविः वक्ति।यथा–

द्रुमाः सुपुष्पाः सलिलं सपद्मं,

स्त्रियः सकामाः पवनः सुगन्धिः।

सुखाः प्रदोषा दिवसाश्च रम्याः,

सर्वं प्रिये चारुतरं वसन्ते।।[२]

साम्प्रतं सर्वत्र मनोज्ञताया एवानुभूतिः जायते। वृक्षाः विकसिताः सन्ति। कमलानि विकसितानि सरस्सु शोभन्ते। रमणीषु कामवृद्धिः प्रजायते। सुगन्धिर्वाति वायुः, सायंकालः सुखप्रद आभाति, दिवसाः रमणीयाः सन्ति। अत एव सर्वत्र चारुतैव दृश्यते।

कालिदासस्यास्यां प्रारम्भिककृताापि तस्य महती पर्यवेक्षणशक्तिः प्रसादगुणेन वर्णनचातुरी च दृश्यते।तस्य प्रकृत्याः सह संवेदनां दृष्ट्वा वर्यावरणं प्रति कवेः दीर्घचिन्तनं सुस्पष्टं जक्ष्यते।

## ५. अभिज्ञानशाकुन्तलम्।

तत्त्वविदः सहृदया विपश्चितो जानन्त्येव सर्वे यदिह संस्कृतसाहित्यपरिषदि कविकुलकमलदिवाकरकालिदासलेखनीविगलितमिदमभिज्ञानशाकुन्तलं नाम नाटकं दृश्यकाव्येषु प्रथमां भूमिकामुपस्थापयतीति। इदं रूपकं महाकविः कालिदासस्य

---

१.ऋतुसंहार –५/२, २. –६/२

प्रौढे वयसि विरचिता श्रेष्ठा कृतिरस्ति। अभिज्ञानशाकुन्तलस्य सर्वनाटकातिशायित्वं तस्य भाषास्वनुवादैः, सहृदयसमाजैरसाधारणप्रचारैः, बहुविधटीकानिर्माणैश्च स्पष्टमेव। तथा च प्रसिद्धेयं सूक्तिः। यथा—

**काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला।**
**तत्राप्यंकस्तुरीयस्तु तत्र श्लोक चतुष्टयम्।।**[१]

विश्वप्रसिद्धे सर्वश्रेष्ठे चास्मिनभिज्ञानशाकुन्तलनाटके सप्तांकाः सन्ति। नाटकस्यादौ पूर्वरंगांगभूतामाशीरूपां " या सृष्टिः स्रष्टुराद्या. " इति श्लोकेन अष्टमूर्तिः भगवान् सदाशिवस्य स्मरणं कृत्वा सूत्राधारः रंगमञ्चे प्रविशति। प्रस्तावनानन्तरं नाटकस्य प्रारम्भो भवति। कण्वाश्रमे शाकुन्तलादुष्यन्तयोर्गान्धर्वविवाहः, आश्रमसंरक्षणार्थं राज्ञो निवासः। तपोवने समारब्धस्य यज्ञस्य निर्विघ्नं समाप्तौ मुनिभि र्विसर्जितः राजा दुष्यन्तः स्वां राजधानीं परावृते सति,राजानं ध्यायन्ती शकुन्तला खिन्नमना वर्तते। तस्मिन्नवसरे द्वारदेशे महर्षिः दुर्वासा भिक्षार्थं समागच्छति, परन्तु दुर्भाग्यवसात् सा नैव जानाति। दुर्वासा तां अन्यमनस्कां शप्त्वा गच्छति।

तीर्थयात्रातः समायाते च महर्षिकण्वे शकुन्तलायाः पतिगृहप्रेषणम्,परं महर्षे दुर्वाससः शापप्रभावेण नृपः शकुन्तलायाः परिणयविधिं विसस्मारं अकथयच्च— "**भोस्तपोधनाः चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याःस्मरामि**" ।**(अभि.५ पृ.२५३)** ततः परावृत्य शकुन्तला मारीचाश्रमे मात्रा सार्द्धं निवसति। अंगुलीयकाभिज्ञानाद्राज्ञः पुनः स्मृतिलाभः, इन्द्रसाहायार्थं स्वर्लोकगमनं चेति। अत्र षष्ठांकः समाप्तिं गच्छति। सप्तमोऽङ्के कालनेमि प्रसूतं दुर्जयदानवगणं निहत्य देवकार्यसम्पादनानन्तरं संभावितो राजा दुष्यन्तो व्योमयानेन मृत्युलोके गच्छन् मध्यमार्गे तत्र तपस्चरतः कश्यपस्य दर्शनलालस्य तदाश्रमावतरति। तत्र शिशुमेकं सिंहकिशोरेण सह मनोविनोदयन्तं पश्यति, नचिराच्च स तस्यैवात्मनः सुतः इत्यधिगच्छति। ततस्तपोवनवासीवेषं दधाना शकुन्तलापि तत्र समायाति,महर्षेः अनूमतिं प्राप्य सपूत्रां शकुन्तलामादाय नृपः सानन्दं राजधानीं प्रत्यागच्छतीति नाटकीयकथा संक्षेपः।

यद्यपि नाटकमिदं शृंगारप्रधानं विद्यते, किन्त्वत्र सर्वत्र कामस्योपरि धर्मविजयस्य सिद्धान्तो दृश्यते। सौन्दर्यभावनायां, चरित्रचित्रणे,रसपरिपाके, अलंकारशैल्यां, भाषासारल्ये च दृश्ट्या? अभिज्ञानशाकुन्तलं सर्वातिशायिस्थानमधिहति। नाटकेनानेनैवातिशयप्रभावितः जर्मनमहाकविः गेटे महोदयो मुक्तकण्ठेन कालिदसस्य प्रशेसा कुर्वन् वदति। यथा—

---

१. अभि. भूमिकातः व्या.कृष्णमणि त्रिपाठी

वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यत्,

यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।

एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो–

रैश्वर्यं यदि वाञ्छसि प्रिय सखे शाकुन्तलं सेव्यताम्।।[१]

(प्रशंसावाक्यानां संस्कृतानुवादः)

वस्तुतः इदमेवाभिज्ञानशाकुन्तलंनाटकं कालिदासस्य मुख्ययशः स्तम्भो वर्तते। अत एव कस्यचिन्मनस्विनः सूक्तिरियं प्रसिद्धास्ति।–

"कालिदासस्यसर्वस्वमभिज्ञानशाकुन्तलम्।।"

## ६. विक्रमोर्वशीयम्।

महाकविः कालिदासस्य द्वितीयं प्रसिद्धं नाटकमस्ति 'विक्रमोर्वशीयम्'। अस्मिन् नाटके पञ्च अंकाः सन्ति। अत्र पुरूरवसः उर्वश्याश्च प्रणयलीला वर्णितास्ति। इदमाख्यानं ऋग्वेदे शतपथब्राह्मणे चोपलभ्यते। अस्मिन् नाटके कालिदासकवित्वमत्वित्कृष्टं दृश्यते। अत्र विरहदृश्यं चातीवचित्ताकर्षकम्। अस्य नाटकस्य नायकः पुरुरवा अतुलबलशली महाराजोऽस्ति, नायिका उर्वशी च अपूर्वा सुन्दरी अप्सरा। अनयोः परम्परानुरागो नाटकस्य प्रंथमांके एव अंकुरितो दृश्यते।

नाटकस्य प्रारम्भे केशिनाऽसुरेण पीड्यमाना उर्वशी अतुलबलवीर्येण महाराजापुरुावसा रक्ष्यते। आपृच्छ्य गच्छन्तौ तौ परस्परानुरक्तौभवतः इति प्रथमांकः।

विदुषकम्प्रति स्वप्रेम्णःकथा कुर्वाणे नृपपुरुरवसि स्वसख्या सममदृश्यमानतया तत्रोऽपस्थिता उर्वशी नृपति–तदासक्ति निशम्य निशाम्य च भूर्जत्वचामारोपितानि स्वानुरागाक्षराणि तत्पुरः पातयति। अथोर्वशीपुरूरवा च परस्परं कथां कुरुतः, किन्तु शीघ्रमेव सा कश्मिश्चिन्नाटकेऽभिनयार्थमपेक्षिता महेन्द्रेण स्वर्गमाहूयते। उर्वशीपातीतं प्रेमपत्रं तु नृपेण विदुषकाय दत्तं, तदवधानेन तद्धस्तच्युतं महादेवीकरं प्राप्नोति येन सा भृशं रिष्यति, नृपेण अनुनीयमानापि च प्रसादं नाधिगच्छति। द्वितीयोऽङ्कः अत्रैव समाप्तिं गच्छति।

अनन्तरं पुरूरवसि भृशमनुरक्ता उर्वशी कुत्रचिन्नाटकाभिनयान्तरे पुरुषोत्तमेति

१. महाकविः कालिदासः, पृ.९५ (डॉ. रामजी उपाध्यायः)

वक्तव्ये पुरूरव इत्युच्चारणापराधात् भरतेन "भुवं गच्छ" इति शप्ता बभूव। इन्द्रप्रार्थनया तु पुरूरवसाजनितं पुत्रं प्रसूय भूयः द्रवलोकमागमिष्यसि इति शिथिलीकृतशापा चासीत्। ततः प्रसन्ना महादेवी नृपमुर्वशीं च परिणेतुमनुजानाति, लोचनगोचरमनायन्ती चोर्वशी तयोर्वार्तापं श्रृणोति, महादंव्यां गतायां च राज्ञः नुरः आविर्भवति। अत्रैव तृतीयांकः पूर्णतां याति।

अथ राज्ञे प्रणये कुपिता उर्वशी निषिद्धस्त्रीप्रवेश्यां कार्तिकेयारण्यं प्रविष्टा लतारूपेण पणिता भवति। तद्विरहे विस्मृतात्मभावः नृपारण्ये इतस्ततस्तामन्विष्यन् जलदं,मयूरं, मधुपं, मृगं, स्रोतस्वीनीं च पृच्छति। अन्ते आकाशवाण्या प्रबोधितः, स तादृशं रत्नं सम्प्राप्नोति यत्प्रभावेण तदाश्लेषे तत्स्पर्शमवाप्य लतारूपोर्वशी स्व पूर्वभावं प्राप्नोति।

तदनन्तरं पञ्चमांकस्य प्रारम्भे मुदितं परिणीतयुगलं राजधानीम्प्रत्यागच्छति। नचिरादेव तु दिव्यं रत्नं गृधेणापहृतं स एकदा पुरूरवसः पुत्रः आयुः इति नामांकितेन बाणेन व्यापादितोऽभत्। शीघ्रमेव तपोवनात् स्त्री काचीत् कंचन क्षत्रीयकुमारमादाय महाराजभवनं प्रविश्य तपोवननियमभंगकारीशिशुरेषः न तत्र निवासमर्हतीदानीम्। तस्मात्त्वयाऽयं प्रतिग्रहणीयः इति नृपमवोचत्।नृपस्तु न किमपि आत्मनः तनयस्य विषये जानाति स्म, तथाऽप्येनं दृष्ट्वा हर्षोऽनुभवति। उर्वशीतु भाविनं नृपेणोत्मनो विरहं चिन्तयती महद्दुःखमनुभवति।

भाग्येन सुखसंवादमादाय नारदः स्वर्गात् अवतीर्य राज्ञो विज्ञापयति, यद् असुरैः सह युध्यमानो वासवः सहायतार्थं भवन्तं स्वर्गलौकमाह्वयति, यावज्जीवं च भवतः उर्वश्या सह संयोगमनुमन्यते। इति

पञ्चमाङ्कः।

कालिदासरचितस्यास्य नाटकस्य कथा ऋग्वेदशतपथब्राह्ममणोपरि सर्वथाऽधारिता प्रतिभाति। अस्मिन् नाटके सम्भोगविप्रलम्भयोरुभयोः श्रृंगारयोः परिपोषो दृश्यते। महाकवेः भाषाप्रसादगुणपूर्णा सम्यगलंकृता विद्यते।

## ७. मालविकाग्निमित्रम्।

मालविकाग्निमिदं नाटकं शुंगशासनकालस्य घटनामाश्रित्य प्रणीतमस्ति। अस्मिन् नाटके पञ्च अंकाः सन्ति। अस्य नाटकस्य सर्वाणि पात्राणि ऐतिहासिकानि सन्ति। माधवसेनः स्वभगिन्याः विवाहं विदिशायाः नृपः अग्निमित्रेण साकं कर्तुमिच्छति, किन्तु यज्ञसेनस्येच्छा नासीत्।

यदा माधवसेनः स्व भगिन्या सह विदिशामव्रजत् तस्मिन् समये मध्ये पथि यज्ञसेनः माधवसेनस्योपरि आक्रमणं विधाय तं बन्दिं कृतवान्। किन्तु माधवसेनस्यान्ये सहचारिणः मालविकया साकं अग्रे अगमन्। पथि दस्यवः तेषामुपरि आक्रमणमकार्षुः। मालविका येनकेनापि प्रकारेण पलायिता सतिपरिभ्रष्टमार्गा विदिशायाः 'सैनिकैः सह विदिशां गत्वा अग्निमित्रस्य राज्ञाः धारिण्याः संरक्षणे न्यस्ता बभूव। कोप्येकः चित्रकारेण रचितं मालविकायाः चित्रं विलोक्य अग्निमित्रःतस्यामासक्तः सन् विदूषकस्यसहायतया मालविकाग्न्या साकं मिलनस्यावसरमपि प्राप।

अग्निमित्रस्य स्वभावेन परिचिता राज्ञी धारिणी मालविकामत्यनतगुप्तरुपेण रक्षयामास। सा वाञ्छति स्म यत् केनापि प्रकारेण अग्निमित्रः मालविकां न पश्येत्, परन्तु मालविकाग्निमित्रयोः प्रणयव्यापारः गुप्तरूपेण वद्धते स्म। सर्वमेतत् एकदा राज्ञी इरावती अपश्यत्। सा च तत्सर्वपट्टमहिष्यै धारिण्यै न्यवेदयत् । तेन राज्ञी धारिणी मालविकां कारागारे करोति स्म।

केषाञ्चन दिनानि व्यतीतवान्, तदनन्तरं मालविकायाःभ्राता माधवसेनस्य सभायामगमत्। तत्र तेन मालविकायाःसर्वं वृतान्तं निवेदितम्। परिचयं प्राप्य महिषी धारिणी ज्ञातवती यत् मालविका दूरतः तस्याः भगिनी वर्तते। तदाकर्ण्य सा अतीवदुखमनुभूतवती। अन्ते मालविकाग्निमित्रयोःपरस्परं पाणिग्रहणसंस्कारः सम्पद्यते स्म।।